# Kutaja

कुटजः कुटिजः कौटो वत्सको गिरिमल्लिका ।
कलिङ्गश्चक्रशाखी च मल्लिकापुष्प इत्यपि ॥
इन्द्रयवफलः प्रोक्तो वृष्यकः पाण्डुरद्रुमः । **(Bpn)**

Synonyms of Kutaja are Kutija, Kauto, Vatsaka, Girimallika, Kalinga, Cakrasakhi, Mallika puspa, Indrayav phala, Vrsyaka, Pandura druma.

कुटजः कौटजः शक्रो वत्सको गिरिमल्लिका ।
कलिङ्गो मल्लिकापुष्पः प्रावृष्यः शक्रपादपः ॥
वरतिक्तो यवफलः संग्राहि पाण्डुरद्रुमः ।
प्रावृषेण्यो महागन्धः स्यात्पञ्चदशाभिधः ॥ **(Rjn)**

Kutaja is otherwise named Kautaja, Sakra, Vatsaka, Girimallika, Kalinga, Mallikapuspa, Pravrsya, Sakrapadapa, Varatikta, Yavaphala, Sangrhahi, Panduradruma, Pravrsenya, Mahagandha.

दीपनः पाचनं ग्राहि रक्तपित्तार्शसां हितम् ।
कृमिकुष्ठप्रशमनं कुटजं तिक्तकं रसे ॥ **(Mdn)**

Kutaja is tikta in rasa, dipana, pacana, grahi in karma, cures raktapitta, arsa, krmi, kustha.

कुटजः कटुको रूक्षो दीपनस्तुवरो हिमः ।
अर्शोऽतिसारपित्तास्रकफतृष्णामकुष्ठजित् ॥ **(Bpn)**

Kutaja is katu, tuvara in rasa, ruksa in guna, hima in veerya, dipana in karma, cures arsa, atisara, pitta asra, kapha, trsna, ama, kustha.

कुटजः कटुकस्तिक्तः कषायो रूक्षशीतलः ।

कुष्ठातिसारपित्तास्रगुदजानि विनाशयेत् ॥ **(Dhn)**
Kutaja is katu, tikta, kashaya in rasa, ruksa in guna, sitala in veerya, cures kustha, atisara, pitta asra, gudaja vikara.

कुटजः कटुतिक्तोष्णः कषायश्चातिसारजित् ।

तत्रासितोऽस्रपित्तघ्नः त्वग्दोषार्शोनिकृन्तनः ॥ **(Rjn)**
Kutaja is katu, tikta, kashaya in rasa, usna in veerya and cures atisara.

Asita variety alleviates pitta, asra, tvag dosha and arsa.

रक्तपित्तकफघ्नस्तु सुकुमारेष्वनत्ययः ।
हृद्रोगज्वरवातासृग्विसर्पादिशु शस्यते ॥ **(C.S.Ka 5)**
Kutaja alleviates raktapitta and kapha. It can be given even in children. It cures hrdroga, jvara, vata asrg, visarpa etc.,

कुटजः कटुको रूक्षो दीपनस्तुवरो लघुः ।
अर्शोऽतिसारपित्तास्रकफतृष्णामपित्तनुत् ॥ **(Mdv)**
Kutaja is katu, tuvara in rasa, ruksa in guna, dipana in karma, cures arsa, atisara, pittasra, kapha, trsna, ama, pitta.

पुष्पन्तु वत्सकस्योक्तं तुवरं चाग्निदीपकम् ।
तिक्तं शीतं वातलं च लघु पित्तातिसारनुत् ॥
रक्तदोषं कफं पित्तं कुष्ठञ्चैवातिसारकम् ।
कृमींश्चैव हरेदेतदुक्तं पूर्वैश्च सूरिभिः ॥ **(Nir)**

Puspa is tuvara, tikta in rasa, laghu in guna, sita in veerya, agni dipaka, increases vata, cures pitta, atisara, rakta dosha, kapha, pitta, kustha, atisara, krmi.

तस्य शिम्बीभवं शाकं व्याञ्जनं चामावातजित् ।
रुच्यं कफघ्नं रक्तातिसारकुष्ठकृमिञ्येत् ॥ **(Sgn)**

Its Simbi, Saka and Vyanjana are Ama vata hara, Rucya, Kaphaghna, cures Rakta atisara, Kustha, Krmi.

कुटजः शीतलो रूक्षः कषायो दीपनः कटुः ।
कफपित्तास्रतृट्कुष्ठजन्तवामार्शोऽतिसारहा ॥

तत्पुष्पं शीतलं तिक्तं कषायं लघु दीपनम् ।
वातलं कफपित्तास्रकुष्ठातीसारजन्तुजित् ॥ **(Kdn)**

Kutaja is kashaya, katu in rasa, ruksa in guna, sita in veerya, dipana in karma, cures kapha, pitta, asra, trt, kustha, jantu, ama, arsa, tisara.

Its puspa is tikta, kashaya in rasa, laghu in guna, sita in potency, dipana, increases vata, pacifies kapha, pitta, arsa, kustha, atisara and jantu.

कुटजत्वक् श्लेष्मपित्तरक्तसंग्राहिकोपशोषणानाम् । (C.S.Su २५)

Kutaja tvak is sangrahi in karma, alleviates slesma, pitta, rakta, and upasosana.

तद्बीजानि कलिङ्गा भद्रयवाश्चेति शक्राह्वाः ।
प्रागिन्द्रनाममिलितैः शब्दैर्यववाचकैश्च कथ्यन्ते ॥ **(Aa ma)**

Its Bija is otherwise called kalinga, bhadrayava, sakrahva, prag indra.

इन्द्रयवा तु शक्राह्वा शक्रबीजानि वत्सकः ।
तथा वत्सकबीजानि भद्रजा कुटजाफलम् ॥
ज्ञेया भद्रयवा चैव बीजान्ता कुटजाभिधा ।
तथा कलिङ्गबीजानि पर्यायैर्दशधाभिधा ॥ **(Rjn)**

Synonyms of Indrayava are Sakrahva, Sakrabija, Vatsaka, Vatsaka bija, Bhadraja, Kutajaphalam, Bhadra yava, Bijanta, Kutajabhidha, Kalinga bija.

इन्द्रयवं त्रिदोषघ्नं संग्राही कटु शीतलम् ।
ज्वरातिसाररक्तार्शःकृमिवीसर्पकुष्ठनुत् ॥
दीपनं गुदकीलास्रवातास्रश्लेष्मशूलजित् । **(Bpn)**

Indrayava is Tridoshaghna, Sangrahi, katu in Rasa, Sita in Potency, cures Jvara, Atisara, Rakta arsa, Krmi, Visarpa, Kustha, is Dipana, and also cures Gudakila, Asravata, Asra, Slesma, Sula.

शक्राह्वाः कटुतिक्तोष्णास्त्रिदोषघ्नाश्च दीपनाः ।
रक्तार्शांस्यतिसारं च घ्नन्ति शूलवमीस्तथा ॥ **(Dhn)**

Sakrahva is Katu, Tikta in Rasa, Usna in Potency, Tridoshaghna, Dipana, cures, Rakta arsa, Atisara, Sula and Vami.

इन्द्रयवा कटुस्तिक्ता शीता कफवातरक्तपित्तहरा ।
दाहातिसारशमनी नानाज्वरदोषशीलमूलघ्नी ॥ **(Rjn)**

Indrayava is Katu, Tikta in rasa, Sita in Potency, Kapha-Vata rakta-Pitta hara,cures Daha, Atisara, Nana jvara, Dosha, Sula and Mula.

वत्सकस्य तु बीजं च कटुतक्तं च शीतलम् ।
ग्राहकं पाचनं चोष्णं चाग्निदाप्तिकरं परम् ॥
वातरक्तं कफं दाहं पित्तं नानाज्वरं तथा ।
शूलमर्शश्चातिसारं त्रिदोषं गुदकीलकम् ॥
कुष्ठकृमिविसर्पामरक्तार्शोऽस्ररुजभ्रमान् ।
श्रमं चैव निहन्त्याशु कथितं मुनिपुङ्गवैः ॥**(Nir)**

Vatsaka Bija is Katu, tikta in rasa, Sita in potency, Grahaka, Pacana, Usna in virya, Agni dipti kara, cures Vata rakta, Kapha, daha, pitta, Nanajvara,

Sula, Arsa, Atisara, Tridosha, Gudakilaka, Kustha, Krmi, Visarpa, Ama, Rakta vikara, Arsa, Asra ruja, Bhrama, Srama.

फलं तिक्तरसं ग्राहि कट्वनुष्णं त्रिदोषनुत् ।
दीपनं पाचनं कुष्ठज्वरवीसर्पशूलनुत् ॥
गुदकीलकवातास्रश्रमलोहितनाशनम् । **(Kdn)**

Phala is Tikta, katu in rasa, Grahi, Usna in Potency, Tridosha hara, Dipana, Pacana, cures Kustha, Jvara, Visarpa, Sula, Gudakila, Vata asra, Srama, Lohita vikara.

इन्द्रयवस्त्रिदोषघ्नं संग्राहि शीतलं कटुः ।
ज्वरातिसाररक्तार्शःकृमिवीसर्पकुष्ठनुत् ॥ **(Mpn)**

Indrayava is Tridoshaghna, Sangrahi, Sita in Potency, Katu in Rasa, cures Jvara, Atisara, Rakta arsa, Krmi, Visarpa, Kustha.